महाचीनाचारक्रमः

नं० १०६९

नं- १०६९-क
मलल्लीनाचार स्तवक
१२ पत्राणि
तन्त्र

5536
F - 12
Complete

महाचीनाचारक्रमतंत्रम्



ॐ श्रीगणेशाय नमः ॐ नमः पार्वत्यै । श्रीदेव्युवाच
महाचीनक्रमाचारः सूचितो न प्रकाशितः । इदानीं
श्रोतुमिच्छामि कथयस्व महेश्वर । इति पृष्टः पुरा दे
व्या कैलासशिखरे हरः । चिंतयामास मनसा किं
चिदामीलितेक्षणः । इयं उत्कंठिता भूयो भूयः प्रे
रयति प्रिया । चीनाचारक्रमं वक्तुं स्वप्रकाशं कथं
मया । अतिगुह्यतरः सोऽयमाचारः सिद्धिदायकः ।
स्त्रीणां चंचलया बुद्ध्या कथं गोप्तुं हि शक्यते । इ
ति संचिंत्य मनसा पुनराह महेश्वरी । महाचीनक्र
माचारं ब्रूहि मे परमेश्वर । श्रीशिव उवाच अलं य
त्नैरलं यत्नैरलं यत्नैर्महेश्वरि । चीनाचारक्रमे श्री
ते विरता भव पार्वति । सर्वथा परमद्वारेण प्रका
श्यः कदाचन । अतिगुह्याद्गुह्यतरः साक्षान्मन्म
यतो शिवे । स्त्रीस्वभावेन देवेशि शाश्वत्त्वं परिपृ
च्छसि । लक्षवारं स्मारितापि श्रोतुमिच्छसि शंकरि ।
श्रीदेव्युवाच यदि चीनक्रमाचारं नाम कथयसि
प्रभो । प्राणत्यागं करिष्यामि पुरतस्ते न संशयः ।
इत्युक्तः शैलतनयासंगचक्राननो महान् । महाची
नक्रमाचारं गदितुं च प्रचक्रमे । सर्वदा गोप्यएवा
यमाचारः । सिद्धिदायकः । भावानुरोधादेवाहं क

ण्यामि महेश्वरि। ब्रह्मणो मानसः पुत्रः वशिष्ठः
स्थिरसंयमः। तारामाराधयामास पुरा नीलाचले
मुनिः। जपन् संतारिणीं विद्यां कामाख्यायोनिमंड
ले। गमयामास वर्षाणामयुतं ध्यानतत्परः। व
र्षायुतेन तस्यैवं चिरमाराधिता सती। नानुग्रहंच
कारासौ तारा संसारतारिणी। अथासौ पितरं गत्वा
ब्रह्माणं परमेष्ठिनं। कोपेन ज्वलितो विद्यां तथाट
पितुरंतिके। द्वादशादित्य संकाशं तपोभिर्ज्वलितं
मुनिम्। ब्रह्मा स च मुनिं प्राह शृणु पुत्रवचो मम।
तत्त्वज्ञानमयीं विद्यां तारां भुवन तारिणीम्। आरा
धय त्वं श्रीचरणे सिद्धियुक्तेन चेतसा। तस्याः प्रसा
दादहोहं भुवनानि चतुर्दश। सृजामि चतुरो वे
दान् कल्पयामि च लीलया। एतामेव समाराध्य
विद्यां भुवनतारिणीम्। तत्त्वज्ञानमयो विष्णुर्भुव
नं पालयत्यसौ। संहारकाले च हरो रुद्रमूर्त्तिधरः
परः। तामेव तारामाराध्य संहरत्यखिलं जगत्।
इत्येवं ब्राह्मणो योगी वशिष्ठः साधकोत्तमः। स्व
पित्रे कथयामास सर्वमाराधनक्रमम्। वशिष्ठ
उवाच। देवानामादिभूतस्त्वं सर्वविद्यामय प्रभो।
नीलाचले चिरमना हविष्यं भुंजता मया। तथापि

महा· क्र· २

2

देव्यास्तारिण्याः करुणामपि नाभवत् । ततो गण्ड
षमात्रं तु काले काले पिबन् जलम् । आराधयामि
तां देवीं वत्सराणां सहस्रकम् । तथापि यदि नो
वाभूत् तारिण्याः करुणामयि । तदाहमेकपादेन
तिष्ठन्नीलाचलोपरि । परं समाधिमास्थाय निराहा
रो दृढव्रतः । तामेव केवलं ध्यायेन् जपन् तामेव
सर्वदा । अतिवाहितवान् वर्षसहस्राष्टकमुत्तमम्
एवं दशसहस्रं तु वर्षाणामिह ईश्वरीम् । कामाख्या
योनिमास्थाय समाराधितवान् प्रभो । अद्याप्यनुग्र
हं तस्यास्तथापि नैव दृश्यते । अतस्त्यजामि दुःसा
ध्यां विद्यामेतां सुदुःखितः । इति तद्वचनं श्रुत्वा ब्र
ह्मा लोकपितामहः । उवाच सान्त्वयन् पुत्रं वशिष्ठं
मुनिनां वरम् । ब्रह्मोवाच । वशिष्ठ गच्छ पुत्र त्वं पु
नर्नीलाचलं प्रति । तत्र स्थितो महादेवीमाराधय
महाव्रत । कामाख्यायोनिमाश्रित्य जगतः परमे
श्वरीम् । अचिराद्देवतासिद्धिर्भविष्यति न संशयः
एतस्याः सदृशी काचिद्विद्या नास्ति जगत्त्रये । इमां
त्यक्त्वा पुनर्विद्यामन्यां कां संग्रहिष्यसि । इति तस्य
वचः श्रुत्वा प्रणम्य पितरं मुनिः । पुनर्जगाम का
माख्यां योनिमंडलसन्निधिम् । तत्र गत्वा मुनिवरः

पूजां संभारनत्परः। आराधयन्महामायां वशि
ष्ठोऽपिजितेन्द्रियः। अथाराधयतस्तस्य सहस्रं
परिवत्सरान्। जल्बुतारामहादेवीपादाम्भोजा
नुवर्त्तिनः। तथापि तत्प्रति प्रीता यथाता भून्म
हेश्वरी। तदातुरोषेन सहसा जज्वाल सम्मुनीश्व
रः। तदा जले समादायतोंच शापमुपक्रमे। एत
स्मिन्नेवकाले तु दृष्टमालोक्य तं मुनिम् चचाल
वसुधा सर्वा सशैलवन कानना। हाहाकारोमहा
नासीद्देवीदेवेषु सर्वतः। ततोवभूव पुरतस्तारा
संसारतारिणी। वशिष्ठ तं समालोक्य शापापाती
व दारुणम्। ततोदेवी महामाया तारिणी सर्वसि
द्धिदा। उवाच साधकश्रेष्ठंवशिष्ठं मुनीनाम्वरम्।
रोषेणदारुणमनाः कथं मामशपद्भवान्। म
यि आराधनाचारं बुद्धरूपीजनार्द्दनः। एकएव
विजानाति नान्यः कश्चन तत्त्वतः। वृथैवयामवा
ह्नल्पः कालोऽयं गमितस्त्वया। विरुद्धाचारशीले
न मम तत्त्वम जानता। उद्धोधरूपिणो विष्णोः स
न्निधिं याहि सम्प्रति। तेनोपदिष्टाचारेण समाराध
यस्वत्वत। तदैव सुप्रसन्नास्मित्वयि यास्याम्यसंशा
यः। इति महाचीनाचारसारतंत्रे सर्वाचारसारोत्त

महा॰
क्र॰
३

इति श्रीमहाचीनाचारक्रमे प्रथमः पटलः १ ततः प्रण
म्य तां देवीं वशिष्ठोऽसौ महामुनिः। जगामाचारविज्ञा
नवांछया बुद्धरूपिणम्। ततो गत्वा महाचीने देशे ज्ञा
नमयो मुनिः। ददर्श हिमवत्पार्श्वे लोकेश्वर संसेवि
तम्। रणत्कंचनरावेण रूपयौवनशालिना। मदिरा
मोदचित्तेन विलासोल्लसितेन च। शृंगारपरिवेशेन
जगन्मोहनकारिणा। भयलज्जाविहीनेन देवीध्या
नपरेण च। कामिनीनां सहस्रेण परिवारितमीश्वरं।
मदिरापानसंजातं मदमेदुरलोचनं। दूरादेव विलो
कैतं वशिष्ठो बुद्धरूपिणं। विस्मयेन समाविष्टः स्म
रन् संसारतारिणीं। किमिदं क्रियते कर्म विष्णुना
बुद्धरूपिणा। देवदेव विरुद्धोऽयमाचारः सम्मतो मया।
इति चिंतयतस्तस्य वशिष्ठस्य महामुनेः। आकाश
वाणी प्राहाशु एवं चिंतय सुव्रत। आचारः परमार्थो
ऽयं तारिणीसाधने मुने। एतद्विरुद्धाचारस्य मतेना
सौ प्रसीदति। यदि तस्याः प्रसादस्त्वमचिरेणाभिवांछ
सि। एतेन चीनाचारेण तदा तां भज सुव्रत। आका
शवाणीमाकर्ण्य लोमांछितकलेवरः। वशिष्ठो द
ण्डवद्भूमौ पपातातीव हर्षितः। तथोत्थाय प्रणम्या
सौ कृतांजलिपुटो मुनिः। जगाम विष्णोः समीपं बु

द्रूपस्य पार्वति। अथासौतं समालोक्य मदिरामो
दविह्वलः। प्राह बुद्धः प्रसन्नात्मा किमर्थं त्वमिहागत
तः। अथ बुद्धं प्रणम्याह भक्तिनम्रो महामुनिः। यदु
क्तं तारिणीदेव्या निजाराधनहेतवे। तच्छ्रुत्वा भग
वान् बुद्धस्तत्त्वज्ञानमयो हरिः। वशिष्ठं प्राह सञ्ज्ञा
तश्चीनाचाराधिकारवान्। अप्रकाश्योऽयमाचारस्ता
रिण्याः सर्वदा मुने। तव भक्तिवशादस्मि प्रकाश्या
मीह तत्परः। बुद्ध उवाच अथाचारविधिं वक्ष्ये ता
रादेव्याः समृद्धिदम्। तस्यानुष्ठानमात्रेण भवाब्धौ
न निमज्जति। समस्तलोकश्यामनन्दादेव विभूति
दं। तत्त्वज्ञानमयं साक्षाद्विमुक्तिफलदायकं स्नानादि
मनसः शौचं मानसस्तु जपः स्मृतः। पूजनं मानसं
दिव्यं मानसं तर्पणादिकं। सर्वं एव शुभः कालो ना
शुभो विद्यते क्वचित्। न विशेषो दिवारात्रौ न सन्ध्या
यां महानिशि वस्त्रासनस्थानगेह देहस्पर्शादिवा
रिणः। शुद्धिं न कारयेदेव निर्विकल्प मनाश्रयः।
नात्र शुद्ध्याद्यपेक्षास्ति न च मयादिदूषणं। सर्वथा
पूजयेद्देवीमस्नातः कृतभोजनः। महानिशि पशु
चोदेशे वलिं मंत्रेण स्नापयेत्। स्त्रीद्वेषो नैव कर्त्त
व्यो विशेषात्पूजनं स्त्रियः। तासां प्रहारनिन्दां च

महा॰
क्र॰
४

कौटिल्यमप्रियं तथा । सर्वथा न च कर्तव्यमन्यथा सि
द्धिरोधकृत् स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभू
षणं । स्त्रीसंगिना सदाभाव्यमन्यथा स्वस्त्रिया सह ।
तद्दत्तावचितं पुष्पं तद्दत्तावचितं जलं । तद्दत्ताव
चितं द्रव्यं देवताभ्यो निवेदयेत् । महाचीनद्रुमल
ताविष्टितः साधकोत्तमः । रात्रौ यदि जपेन्मंत्रं डल्ली
में तस्य किं भवेत् । महाचीनद्रुमलतावेष्टनेन च
यत् फलं । तस्यापि षोडशांशेन कलां शंहंति ते
शिवाः । शिवासनाधिकफलं लतागेहप्रवेशनं ।
श्मशानालयमागत्य मुक्तकेशो दिगम्बरः । महा
चीनद्रुमलतावेष्टितो मुक्तिमाप्नुयात् । जपस्थाने
महाशंखं निवेश्योर्द्ध्वं जपं चरेत् । स्त्रियं गच्छन् स्पृ
शन् पश्यन् यत्र तत्रापि साधकः । भक्षं ताम्बूल
मन्यांश्च भक्ष्यद्रव्यान् यथारुचीन् । भक्ष्याण्यशेष
द्रव्याणि दत्वा भक्षन् परे जपः । दिक्कालनियमो ना
स्ति स्थित्यादिनियमो न च । न जपेत् काल नियमो
न च दिक् वलिष्वपि । स्वेच्छाचारान्नादिरतः प्रचरे
त् हृष्टमानसः । कृतार्थं मन्यमानस्तु संतुष्टनिज
मानसः । स्वर्गंधिस्नेहलौहित्य कुंकुमैरर्द्धयेच्छि
वां । विल्वैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः ।

एकलिंगेश्मशाने वा निर्जने वा चतुष्पथे। तट
स्थः साधयेद् योगी तारां भुवनतारिणीं। तारिणी
दक्षिणा काली भैरवी सुन्दरी तथा। महाचीनक्र
मेणैव सिध्यंते नात्र संशयः। सुन्दरी भैरवीदेव्याः
प्रकारोऽन्योपि विद्यते। तारिणी दक्षिणासिद्धिर्नैव
चीन क्रमं विना। महाचीनक्रमाचार तत्परः
साधकोत्तमः। तारिणी पूजने विद्याकुलकोटिं
समुद्धरेत्। नृत्यंति पितरः सर्वे गाथां गायंति ते
मुदा। अपिनः स्वकुले कश्चित् कुलज्ञानी भविष्य
ति। सधन्यः स चिरज्ञानी स कविः स च पण्डितः।
स कुलीनः स सुकृती स बली सच साधकः। स
ब्राह्मणः स देवज्ञः सोऽग्निहोत्री सदीक्षितः। सती
र्थो देवीपीठानां स निरामी च सर्वदा। सव्रती सो
मयाथी सः स यज्वा सर्वमंत्रविद्। स वैष्णवः स
शैवश्च ससौरः स च गाणपः। महाचीनक्रमाचा
रे स्तारिणीं यः सदा भजेत्। इति महाचीनाचार
सारतंत्रे सर्वाचारसारोत्तमोत्तमे महाचीनाचार
क्रमे द्वितीयः पटलः २ इति तस्य वचः श्रुत्वा हरे
रर्द्धशरीरिणः। वशिष्ठस्तं पुनः प्राह कृतांजलि
पुटो मुनिः। वशिष्ठ उवाच। भगवन् देवदेवेश

महा॰
क्र॰
५

तत्र ज्ञानमय प्रभो । महाचीनक्रमाचार सम्यक्तोभा
वनामम । प्रधानद्वयमेवास्मिन् मदिरा योषितेवचं
पनयोः किं प्रधानंत्त ब्रुहि मे परमेश्वर । श्रीभगवानु
वाच । एतस्मिन् परमाचारे तत्वमेवद्वयं मुने । प्रा
धान्यं योषितो किंतु देवादेव न संशयं । यतो हि यो
षितो देहे सर्वदेवस्य संस्थितिः । अतः पूजास्तु सर्वा
सुतासां प्राधान्यमुच्यते । वशिष्ठउवाच । ब्रुहि देव
विधानंच सर्वज्ञानमयप्रभो । यथा योषितस्तु पू
जास्तु कृतास्तु स्तुरसत्तमः । श्रीभगवानुवाच । योनि
पीठे मंत्रपीठे मनःपीठे च पार्वति । विधाभिन्ना म
यामाया पूज्यते साधकोत्तमैः । सर्वेषामेव पीठानां
प्रधानं योनिपीठकं । तत्र संपूजिता देवी झटित्ये
व प्रसीदति । अणिमाद्यष्टसिद्धीनां कारणं परमं
मुने । तस्याः पूजाविधिं वक्ष्ये मम सर्वज्ञसाधनं । न
टी कापालिनी वेश्या रजकी नापितांगना । ब्राह्मणी
शूद्रकन्या च तथा गोपालकन्यका । विदग्धा सर्व
जातीया मंत्रयुक्ता च तत्परा । गुरुपादगता ग्राह्या
नान्यथा वरवर्णिनि । अन्यथा तु वरारोहे नरके
पतति ध्रुवम् । आनीयाच्च तमां भद्रामेकशः कुल
नायिकां । सुन्दरीयौवनोन्मत्तां निर्लज्जां चारुहासि

नीं कृत्वा दिगम्बरीं तां च गन्धचन्दन कुंकुमैः। स्रुत
लिंगां मुक्तकेशीं तत्तस्तद्द् योनिमण्डले। पीठपूजां
विधायाथ तन्मध्ये पूजयेच्छिवां। उपचारैः पूजयि
त्वा चार्घ्यं दत्त्वा ततः पुनः। तस्यालिंगे भैरवं च पूज
यित्वा महेश्वरीं। गन्धासवाक्ततैः पुष्पैं होमं कुर्य्या
दतः परं। धर्म्माधर्म्म हविर्दीप्तौ लग्नौ च मनसा
स्रुवा स्रुक्षुम्ना वर्त्मनादित्यग्रस्तहन्तौ जुहोम्यहं। स्वा
हान्तो होममंत्रोऽयं प्रतिष्ठान्ताहुती शिवे। पूर्णाहु
तिं वसांते च जुहुयान्मनुनामुना। प्रकाशाकाश
हस्ताभ्यां नवनम्योन्मणीस्रुवाधर्म्माधर्म्मं कलास्ते
हपूर्णं वह्नौ जुहोम्यहं। स्वाहान्तोयं भवेन्मंत्रो घोर
पातक मुक्तिदः। पूजाकाले विनानैव पश्येच्छक्तिं
दिगम्बरीं। पूजाकाले विनानैव सुरापेये च साधकः
आयुषा हीयते दृष्ट्वा पीत्वापि नरकं व्रजेत्। सौत्रा
मण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम्। अन्य
त्र कामतः पीत्वाप्रायश्चित्ती भवेद्ध्रुवं। भार्गवेण
सुरा शप्ता स्तुत्वा देवी च वारुणी। ब्रह्मलोक गुरुः
साक्षात् प्रययौ भार्गवान्तिकम्। प्रसाद्योवाच तं
ब्रह्मावाचोऽमृतसमालयः। देवानाममृतं ब्रह्म त
दियं लौकिकी सुरा। ब्रह्मज्ञानमयी देवी कुलाचा

रेण कृष्यते। सौत्रामण्यांच देवास्तु स्तर्पयंते सुरयैव हि।
सेयं शप्ता त्वया ब्रह्मन् तस्याः शापं प्रमोचय। ब्रह्मा
णं प्रणिपत्याह यतोसौ भृगुनन्दनः। मद्याकं वि
फलं न स्याद्विज्ञानेच पितामह। श्रावयप्यकं करि
ष्यामि तदर्थं नियमः कृतः। सौत्रामण्यां कुलाचारः
सुरा शाप विमुक्तये। मंत्रं क्रमं प्रवक्ष्यामि शृणु चै
कमनाभव। एकमेव परंब्रह्म स्थूलसूक्ष्ममयं ध्रुवं।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहं। सूर्यमण्ड
लसंभूते वरुणालयसम्भवे। अमाबीजमये देवि
शुक्रशापाद्विमुच्यतां। वेदानां प्रणवोबीजं ब्रह्मान
न्दमयं यदि। तेनसत्येन देवेशि ब्रह्महत्यां व्यपोह
तु। इत्युक्त्वा ब्रह्मणो मर्म्मान् भार्गवः प्रणिपत्य तं।
जगाम भवनन्देवि ब्रह्मा स्वभवनं ययौ। ब्रह्मज्ञानं
कुलाचारे सुरां पीत्वा स्खलन् मुहुः। पतितस्य तु
तस्याङ्गं गणयंति यदि वैष्णवः। तावत्कालं वैष्णं सं
ख्यं देवी लोके महीयते। पीत्वालिंगे कुलाचारो म
दिरां यौवनान्वितां। कोटिजन्मार्ज्जितं पापं तत्क्ष
णादेव नाशयेत्। पीत्वा पीत्वा जपित्वा च मुक्तिः को
टिकुलैर्युतो ब्रह्मलोके वसेद्देवि सत्यं सत्यं न संश
यः। तत्रैव व्याप्तिमाप्नोति न पुनर्जायते भुवि। पी

त्वा च पूजयेद्देवी मीश्वरत्वं भवेद् ध्रुवं। तत्रैव ल
यमाप्नोति पुनर्नैव निवर्त्तते। पीत्वापि कुण्डे द्र
व्यं च त्रैलोक्यैश्वर्य्यभाजनाः। जायन्ते साधकाः स
र्वे महायोगी महासुखी। पीत्वा योगी योजयित्वा
सोऽहं गच्छति तत्परः। स्वाहेति जायते वीजो जी
वन्मुक्तो जगत्त्रये। चिरजीवी जरामुक्तो विमुक्तः
सर्वपातकैः। अणिमादियुतोऽपि स्यात् सत्यं सत्यं
न संशयः। इति ते कथितं गुह्यं सुराणाय विमो
चनं। इत्येवं कथिता तुभ्यं यथा पूजा दिगम्बरि।
पूजयित्वा सकृद्देवी मुच्यते हि महाभयैः। एवं
देवीमर्च्चयित्वा किमसाध्यं जगत्त्रये। हरे प्रकुपि
ते वाणः पूजयित्वा दिगम्बरीम्। सृष्टिस्थितिल
यादीनां कर्त्ता भूज्जगदीश्वरः। रोगेभ्यो घोररूपे
भ्यः पूजयित्वा विमुच्यते। अपुत्रो लभते पुत्रं द
रिद्रो धनवान् भवेत्। आरभ्य शुक्लप्रतिपद्भ्या
वत् पंचदशी भवेत्। प्रत्यहं पूजयेद् यस्तु ति
थिसंख्या दिगम्बरी। सर्वसिद्धिर्भवेत्तस्य सत्यं स
त्यं न संशयः। वीरसाधन कर्म्माणि दुःखसाध्या
नि केवलं। सुखसं साधनं ह्येतत्तव स्नेहात् प्रका
शितं। गोपनीयं प्रयत्नेन पुत्रेभ्योऽपि न दर्शये

महा
वी० क्र०
७

त्। इत्येतत्कथितं तुभ्यं पूजाविधिमनुत्तमं। साथ
नं सर्वथा चैनं गोपयेन्मातृजारवत्। इति महाची
नाचारतंत्रे सर्वाचारसारोत्तमोत्तमे महाचीनाचार
क्रमे तृतीयः पटलः ३ वशिष्ठ उवाच। कुलेशानि
प्रश्नस्तानां पिशितानां च लक्षणं। कुलद्रव्यस्य नि
र्माणं वद माहात्म्यमेव च। अविधानेन यत् पापं
सविधानेन तत् फलं। तत् सर्वं श्रोतुमिच्छामि व
द मे करुणानिधे। श्रीभगवानुवाच। मुने शृणु प्र
वक्ष्यामि यन्मां त्वं परिपृच्छसि। तस्य श्रवणमात्रे
ण विदग्धोः समतां व्रजेत्। आधारेण विना पात्रं
न च तर्पंति मातरः। तस्माद्विधिवदाधारं कल्प
येत् कुलनायकः। आधारं त्रिपदं प्राहुः षट्पदं
वा चतुष्पदं। अथवा वर्तुलाकारं कुर्यादतिमनो
हरं। स्वर्णरौप्यशिलाकूर्मकपालालाबुमृण्मयं।
प्रणपहस्तसमुद्भूतं पात्रं कुर्याद्विचक्षणः। अति
स्वल्पमतिस्थूलं छिन्नभिन्नं च वर्जयेत्। अंगुलं द्वा
दश प्रस्थे प्रस्थार्द्धं तत्क्रमेण च। तण्डुलानां चतुः
प्रस्थं द्विप्रस्थं पयसस्तथा। मुष्टिमात्रांकुरं देवि
एकस्मिन् योजयेच्छुचिः। प्रीतादिरहिते स्थाने
स्थापयेद्दिवसद्वयं। ततो वह्नौ समारोप्य जप्त्वा

लमहर्षं प्रचेत् । अवरोप्य पुनः शीताम वस्यामा
नयेद्बुधः । पयः पूर्वं च पीत्वा तु हस्ताभ्यां मेलये
त्ततः । सम्यग् गुडक्रमेणैव पयसा लोड्य मेलयेत् ।
एषा पैष्टीति विख्याता पूजिता देवतानरैः । गुरुं
स्मरन् पिबन् मद्यं खादन् मांसं न दोषभाक । से
वते चेत् स्वसौख्यार्थाय मद्यादीन् स च नारकी । आ
शये देवताप्रीत्यै अभिशापविवर्ज्जितैः । श्वपचोऽ
पि कुलज्ञानी ब्राह्मणादतिरिच्यते । यः कौलिकः
कुलज्ञाने न पक्षपाती न विन्दति । धिक् तस्य जीव
ने लोके धिक् तस्यापि च पौरुषं । ते विद्यापुण्यक
र्माणस्ते शान्तास्तेऽपि योगिनः । येषां चित्ते भाग्य
वशात् कुलज्ञानं प्रकाशते । ते वन्द्यास्ते महात्मा
नः स्वकृतार्थनरोत्तमाः येषामुत्पद्यते चित्ते कु
लज्ञानं मयोदितं । त्रासिता हि मया पूर्वं पशवः
शास्त्रकोटिभिः । कुलधर्म्मं न जानन्ति ततो ज्ञाना
भिमानिनः पशुशास्त्राणि सर्वाणि मयैव कथि
तानि वै । स्पष्टकेन च मंत्रेण मोहनाय दुरात्मनां
महती पशुभावानां तेषां वांछापि जायते । तेषां
च सद्गतिर्नास्ति कल्पकोटिशतैरपि । बहुशः
कौलिकं धर्म्मं श्रुत्वा ज्ञानविभेदकं निन्दन्ति ह

मह्रा
बी॰क्र॰
८

स्तुद्धौच पारम्पर्येपि विमोहिताः। वशिष्ठ उवाच। मद्यपानेन मनुजो सिद्धिं सम्यग् लभेत् प्रभो। मद्यपानरताः सर्वे सिद्धिं यान्तु चपाशयाः। मांसभोजनमात्रेण यदि पुण्या गतिर्भवेत्। लोके मांसाशिनः सर्वे पुण्यभाजो भवन्ति वै। स्त्रियोभोगे कौलिकानां यदि मोक्षो भवेदिह। सर्वेपि जंतवो लोके मुक्ताः स्युः स्त्रीनिषेवणात्। बुद्ध उवाच। अतः शृणुष्व त्वं पुत्र कुलधर्म्मो महानयः। मोक्षं ददाति वे नाश एतद्धर्मप्रवर्त्तिनां। हथापाने यत् क्रियते सुरापाने तदुच्यते। स महापातकी चैव वेदादिषु निरूपितः। वशिष्ठ उवाच। तत्त्वतो श्रोतु मिच्छामि कुलधर्मं विशेषतः। एतस्य तु विशेषस्तु तत्र समो नास्ति कश्चन। तस्य धर्मस्य माहात्म्यं सर्वधर्मोत्तमस्य च। वद मे परमेशान यदि चास्ति कृपा मयि। श्रीभगवानुवाच। मुने शृणु प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि। तस्य श्रवणमात्रेण योगिनां प्रत्ययो भवेत्। शिवो वक्ता महायोगी यन्मया कथितं पुरा। कथयामि तव स्नेहाच्छृणु ष्वैकाग्रमानसः। सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवोत्तमः। वैष्णवाद्दुत्तमः

4

शैवः शैवाद्दक्षिणमुत्तमं । दक्षिणादुत्तमं वा
मं वामात् सिद्धांत मुत्तमं । सिद्धांतादुत्तमं कौ
लं कौलात् परतरं नहि । गुह्याद् गुह्यतरं वत्
स सारात्सारतरं परं । मयि ब्रह्मज्ञानमंथेन वे
दागममहार्णवं । संशाप्यस्ते मया सोऽयं कु
लधर्मः समुद्धृतः । एकतः सकला धर्म्मा यज्ञ
दानजपादयः । एकतः कुलधर्मोऽयं सर्वेय
ज्ञाधिकप्रियः । प्रविशंति यथा नद्यः समुद्रं
मुक्तबंधनाः । तथैव समयाः सर्वे प्रविष्टाः
कुलवर्त्मनि यथा हस्ति पदे लीनं सर्वप्रा
णिपदं भवेत् । दर्शनानि च सर्वाणि कुलत्र
यः तथा मुने । यथा सरत्तरंगिण्या न समास
फलोपगाः । तथैव समयाः सर्वे कुलधर्मेत
सेवकाः सेहकार्य्य पयो म्हह्लि स्त्र्यास्तुख्येत
रो यथा तथास्य समय स्यास्य कुलस्य महदं
तरं । अस्ति चेज्ज्ञानवान् कश्च मत्त् समो भुवि
मानवः । तथैव कुलधर्मेण समो नास्ति जग
त्रये । जन्मभिर्बहुभिर्यन्यास्तपोभिर्मुक्तिसत्त
मः । मोक्षं लभंतते सर्वे जीवन्मुक्तास्त कौ
लिकाः । सत्यं सत्यं पुनः सत्यं सत्यं सत्यं न सं

महा
ची॰क्र॰
५

शयः । बहुनावा किमुक्तेन शृणुष्व प्रयतात्मनः । न
कौलेन समो धर्म्मः सत्यमेतद्वदामि ते । योगी चे
न्नैव भोगी स्याद्भोगी चेन्न तु योगवान् । योगभोगा
त्मकं कौलं तस्मात् सर्व्वाधिकं त्विदम् । इति महाची
नाचारसारतंत्रे सर्व्वाचारसारोत्तमोत्तमे महाची
नाचारक्रमे चतुर्थः पटलः ४ श्रीभगवानुवाच
समयाष्टकं प्रवक्ष्यामि शृणुष्वैकाग्रमानसः । ये
न विज्ञानमात्रेण सिद्धो भवति साधकः । ज्ञातये
द्गोपयेत्तत्र निन्दयेन्न कदाचन । पूजयेद्भाव
येच्चैव जपयेन्न तु गोपयेत् । कामं क्रोधं तु मात्
सर्य्यं विकारं चिंतनोद्भवम् । निद्रा लज्जादोर्म्म
नस्यं त्याजयेदष्टकं प्रिये । मंत्रं मुद्रां कमुद्रां च यो
गिनीनां च संगमम् । मुद्रांत्तवा पाठांतरम् । भैर
वीगमनाचारमेतत् सर्व्वं प्रगोपयेत् । कुले गुरुं
स्वपां विद्यां साधकान् शोभितं तथा । शुभाशुभं च
यत्कर्म्म निंद्यं नैव कदाचन कन्यायोनिं पशुक्री
डां नग्नां स्त्रीं प्रकटस्तनीम् । युतविग्रहपापार्थ्या
न् सर्व्वथा न विलोकयेत् । गुरुं देवीं तथा साधू
न् शक्तिं चात्मानमव्ययम् । भक्तितः साधकान्
सर्व्वान् पूजयेच्च प्रयत्नतः । गुरुवाक्योपदेशं च

साधूक्तिं इष्टदेवताम्। स्वधर्म्मंच कुलाचारं सदा
ध्यानेच भावयेत्। अगम्यागमनंचैव पूर्त्तगो
ष्ठींच वर्ज्जयेत्। अनृतं पापगोष्ठींच वर्ज्जयेत् कु
लनायकः विएमूत्र शोणितक्लेदहीनांगी पिव
तीसुराम्। कपाल हरणंचैव अष्टावेवजुगुप
सयेत्। इत्येवं समयाचारं यः करोति हि साधकः
संप्राप्य देवीसंभावं जीवन्मुक्तिंच गछति। एवं
तारामते प्रोक्तं सर्व्वसिद्धिरनुत्तमा। अनेन ची
नाचारेण साधकः स्वयमीश्वरः। अनेन चीनाचा
रेण तारामाराध्य साधकः। यद्वा न लभते वस्तु
तन्नास्ति भुवनत्रये श्रीदेव्युवाच। देवदेव महादे
व जगत् प्रलयकारकः। कुलाचारंन मद्याद्यैः क
थं सिद्धिर्भवेत् प्रभोयदेतन्मदिरापानं यत् पर
स्त्रीनिषेवणम्। अधर्म्मकारणं सर्व्वं छिन्धि मे
संशयं विभो। श्रीशिवउवाच। साधु पृष्टं त्वया
देविकथयामि शृणुस्वमे। पुरादारुमपेरम्ये मु
नयः साधनापराः। मद्यपाने चिकीर्षन्ति परस्त्री
चर्षणंच वै। तान् दृष्ट्वा सुचिन्ताधर्म्मान् ब्रह्मामा
पर्युपस्थितः। देवदेव महादेव सृष्टिस्थिति ल
यात्मक। एते दारुवने पापामद्यपानरतास्तथा।

म॰ ची॰ क्र॰ २॰

परस्त्रियं चर्वयंतिमद्यं स्वादंति नित्यशः। दिगा
म्बरास्तुएतेनाथ गतिरेषां कथं भवेत्। इति ब्र
ह्मवचः श्रुत्वा तमुवाच रघूद्वह। प्रिये पितामह न
जानासि चीनाचारक्रमंभवान्। उग्रतारां महा
विद्यां एतेनित्यं जपंति हि। पूजयंति च तामे
व चीनाचारपरायणाः। साधकाः सर्व एवैते
महात्मानो महाशयाः। जीवन्मुक्तिगताः सर्वे
देवीभक्तिपरायणाः। परस्त्रीचर्वणाच्चैव म
द्यपानाच्च नित्यशः। अश्वमेधादप्यधिकं लभंते
फलमुत्तमम्। एतांस्तु निन्दयेद्यस्तु महापा
तकवान् भवेत्। इतो दूरं प्रयाहि त्वं त्वं मां स्र
ष्टा पितामह। परं विस्मयमापन्न संभ्रायाविष्ट
मानसः। किमिदं शम्भुना प्रोक्तं वेदविद्याविधा
नकृत्। इति संचिंतय मौनं प्राह पंकजसम्भ
वम्। उवाच साधकास्ते वै जीवन्मुक्ता महाशयाः।
परस्त्रियं चर्वयंति मद्यं स्वादंति नित्यशः। नि
र्वाणं ते च यास्यंति भगवत्याः प्रसादतः। ची
नाचारं समाश्रित्य मुनयस्ते महाशयाः। तत्त्व
ज्ञानमयाः सर्वे विहरंति महीतले। त्वं शीघ्रं ग
च्छ तत्रैव तान् प्रसादय पद्मज तेषु तुष्टेषु म

ततो ब्रह्मत्वमपि यास्यसि। महादेवेन यत् प्रोक्तं
सत्यमेतन्न संशयः। अवयोः स न संस्पर्शो तस्मा
थकान् यो विनिन्दति। श्रीशिवउवाच। ततो मा
यां प्रणम्यासौ परमेष्ठी पितामहः। गत्वा दारुव
ने सर्वान् प्रणनाम मुनीश्वरान्। तुष्टाव परया
भक्त्या स्तोत्रैर्बहुविधैरपि तेषां प्रसादमासाद्य
कृतकृत्योऽभवद्विधिः। श्रीदेव्युवाच। महाची
नक्रमाचारं ततो बुद्धादवाप्य च। वशिष्ठः स कि
मकरोत् तन्मे ब्रूहि महेश्वर। श्रीशिवउवाच। म
हाचीनक्रमाचारं ततो देवादवाप्य स। नीलाचले
समागम्य कुलाचारपरायणः। नीलगिरिं समा
साद्य इति वा पाठः। ततोऽक्षमालां प्रवर्ती चाण्डा
ली रमयेन्मुनिः। जपन् संसाधयामास तारां मु
क्तिप्रदायिकाम्। तारामाराधयामास कृतकृत्यो
ऽवभवत्तदा। साक्षाद्भूता महादेवी तारा संसार
तारिणी। तारोवाच वशिष्ठ त्वं वरान् वृणु यथे
प्सितान्। श्रीशिवउवाच। तारादेवी जगन्मात
र्ज्ञानविज्ञानदायिनी। वरमेकं वृणोमि त्वं प्रस
न्ना यदि मे शिवे। महाचीनक्रमाचारैर्यस्त्वां सं
पूजयिष्यति। सर्वदा तस्य मातस्त्वं सुप्रसन्ना भ

म॰ ची॰ क्र॰ ११

विष्यति। श्रीभगवानुवाच। चीनाचारेण यः कश्चिन्
तारां मां पूजयिष्यति। स मे पुत्रत्वमागम्य सत्यं स
त्यं न संशयः। इह भोगान् वरान् भुक्त्वा बृहस्पति
रिवापरः। अन्ते यास्यसि मत्पार्श्वे यत्र मे गणना
यकः। रूपयौवनसम्पन्नैर्दिव्यकन्यागणैः सह।
विहरत्यप्यसौ धीरो यावच्चन्द्रार्कतारकाः तत्रापि
भविता वत्स योगसिद्धिरनुत्तमा। अणिमाद्याः सि
द्धयस्त्वां सेविष्यन्ति निरंतरम्। इति लब्ध्वा वरं तस्मा
द्वशिष्ठोऽसौ महामुनिः। तदत्र लोकमासाद्य वा
यापि यो तते विधिः। एष ते कथितो देवि चीनाचा
रः सुदुर्लभः। समाचारान् साधकेन्द्रो भुक्तिमुक्ति
लभेद्भुवि एतत् सर्वं प्रयत्नेन गोपितव्यं तथा
प्रिये। यथान्योऽन्येन लभते तथा कार्य्यं महेश्वरि।
स्वयोनिमिव देवेशि गोपयेत् पशुसन्निधौ। यो भ
क्तः साधको ज्ञानी तस्मै वक्तव्यमेव हि। इति महा
चीनाचारसारतंत्रे सर्वाचारसारोत्तमोत्तमे महा
चीनाचारक्रमे पंचमः पटलः ५ आलिंगने चुम्ब
ने च स्तनयोर्मर्द्दने तथा। दर्शने स्पर्शने योने
र्विकाशे लिंगघर्षणम्। प्रवेशः स्थापने शक्ते
र्नवपुष्पाणि पूजने। विषं पीत्वा सुरां भुक्त्वा मांसं

गत्वा रत्नस्थलाम्। यो जपेच्चण्डिकां देवीं तस्य
दुःखं पदे पदे। देया विद्यार्थिने विद्या व्याधितेभ्य
श्च औषधम्। देयं द्रव्यार्थिने द्रव्यं त्रयः स्वर्गस्य
लक्षणम्॥ इति महाचीनाचारसारतन्त्रे सर्वाचा
रसारोत्तमो नाम महाचीनाचारक्रमः समाप्तः॥

12

